## ॐ श्रीपरमात्मने नमः। अथ द्वितीयोऽध्यायः। साङ्ख्ययोगः।

सञ्जय उवाच
तं तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यम् उवाच मधुसूदनः॥१॥

श्रीभगवानुवाच
कुतस्त्वा कश्मलमिदम् विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यम् अकीर्तिकरमर्जुन॥२॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यम् त्यक्त्वोत्तिष्ठ परन्तप॥३॥

अर्जुन उवाच।
कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन॥४॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥५॥

न चैतद्विद्मः कतरन्नो गरीयः
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥६॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥७॥

न हि प्रपश्यामि ममापनुद्यात्
यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धम्
राज्यं सुराणामपि चाधिपत्यम्॥८॥

सञ्जय उवाच
एवमुक्त्वा हृषीकेशम् गुडाकेशः परन्तपः।
न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह॥९॥

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः॥१०॥

**श्रीभगवानुवाच**
अशोच्यानन्वशोचस्त्वम् प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥११॥

न त्वेवाहं जातु नासम् न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥१२॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति॥१३॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत॥१४॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरम् सोऽमृतत्वाय कल्पते॥१५॥

नासतो विद्यते भावः नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तः त्वनयोस्तत्त्वदर्शिभिः॥१६॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति॥१७॥

अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥१८॥

| | |
|---|---|
| य एनं वेत्ति हन्तारम्   यश्चैनं मन्यते हतम्।<br>उभौ तौ न विजानीतः   नायं हन्ति न हन्यते॥ १९॥ | अव्यक्तादीनि भूतानि   व्यक्तमध्यानि भारत।<br>अव्यक्तनिधनान्येव   तत्र का परिदेवना॥ २८॥ |
| न जायते म्रियते वा कदाचित्<br>नायं भूत्वा भविता वा न भूयः।<br>अजो नित्यः शाश्वतोऽयं पुराणः<br>न हन्यते हन्यमाने शरीरे॥ २०॥ | आश्चर्यवत्पश्यति कश्चिदेनम्<br>आश्चर्यवद्वदति तथैव चान्यः।<br>आश्चर्यवच्चैनमन्यः शृणोति<br>श्रुत्वाप्येनं वेद न चैव कश्चित्॥ २९॥ |
| वेदाविनाशिनं नित्यम्   य एनमजमव्ययम्।<br>कथं स पुरुषः पार्थ   कं घातयति हन्ति कम्॥ २१॥ | देही नित्यमवध्योऽयम्   देहे सर्वस्य भारत।<br>तस्मात्सर्वाणि भूतानि   न त्वं शोचितुमर्हसि॥ ३०॥ |
| वासांसि जीर्णानि यथा विहाय<br>नवानि गृह्णाति नरोऽपराणि।<br>तथा शरीराणि विहाय जीर्णानि<br>अन्यानि संयाति नवानि देही॥ २२॥ | स्वधर्ममपि चावेक्ष्य   न विकम्पितुमर्हसि।<br>धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्   क्षत्रियस्य न विद्यते॥ ३१॥<br><br>यदृच्छया चोपपन्नम्   स्वर्गद्वारमपावृतम्।<br>सुखिनः क्षत्रियाः पार्थ   लभन्ते युद्धमीदृशम्॥ ३२॥ |
| नैनं छिन्दन्ति शस्त्राणि   नैनं दहति पावकः।<br>न चैनं क्लेदयन्त्यापः   न शोषयति मारुतः॥ २३॥ | अथ चेत्त्वमिमं धर्म्यम्   सङ्ग्रामं न करिष्यसि।<br>ततः स्वधर्मं कीर्तिं च   हित्वा पापमवाप्स्यसि॥ ३३॥ |
| अच्छेद्योऽयमदाह्योऽयम्   अक्लेद्योऽशोष्य एव च।<br>नित्यः सर्वगतः स्थाणुः   अचलोऽयं सनातनः॥ २४॥ | अकीर्तिं चापि भूतानि   कथयिष्यन्ति तेऽव्ययाम्।<br>सम्भावितस्य चाकीर्तिः   मरणादतिरिच्यते॥ ३४॥ |
| अव्यक्तोऽयमचिन्त्योऽयम्   अविकार्योऽयमुच्यते।<br>तस्मादेवं विदित्वैनम्   नानुशोचितुमर्हसि॥ २५॥ | भयाद्रणादुपरतम्   मंस्यन्ते त्वां महारथाः।<br>येषां च त्वं बहुमतः   भूत्वा यास्यसि लाघवम्॥ ३५॥ |
| अथ चैनं नित्यजातम्   नित्यं वा मन्यसे मृतम्।<br>तथापि त्वं महाबाहो   नैवं शोचितुमर्हसि॥ २६॥ | अवाच्यवादांश्च बहून्   वदिष्यन्ति तवाहिताः।<br>निन्दन्तस्तव सामर्थ्यम्   ततो दुःखतरं नु किम्॥ ३६॥ |
| जातस्य हि ध्रुवो मृत्युः   ध्रुवं जन्म मृतस्य च।<br>तस्मादपरिहार्येऽर्थे   न त्वं शोचितुमर्हसि॥ २७॥ | हतो वा प्राप्स्यसि स्वर्गम्   जित्वा वा भोक्ष्यसे महीम्।<br>तस्मादुत्तिष्ठ कौन्तेय   युद्धाय कृतनिश्चयः॥ ३७॥ |
| अव्यक्तादीनि भूतानि   व्यक्तमध्यानि भारत।<br>अव्यक्तनिधनान्येव   तत्र का परिदेवना॥ २८॥ | सुखदुःखे समे कृत्वा   लाभालाभौ जयाजयौ।<br>ततो युद्धाय युज्यस्व   नैवं पापमवाप्स्यसि॥ ३८॥ |

ॐ तत् सत्। श्री कृष्णार्पणमस्तु॥

(अवशिष्टाः श्लोकाः आगामिनि वर्षे अनुवर्तिष्यन्ते।)